## अथ काश्यपगीता ॥

अत्राप्युदाहरन्तीमा गाथा नित्यं क्षमावताम् ॥
गीताः क्षमावतां कृष्णे काश्यपेन महात्मना ॥ २ ॥

क्षमा धर्मः क्षमा यज्ञः क्षमा वेदाः क्षमा श्रुतम् ॥
य एतदेव जानाति स सर्वं क्षंतुमर्हति ॥ ३ ॥

क्षमा ब्रह्म क्षमा सत्यं क्षमा भूतं च भावि च ॥
क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ॥ ४ ॥

अतियज्ञविदांलोकान्क्षमिणः प्राप्नुवन्ति च ॥
अतिब्रह्मविदांलोकानतिचापि तपस्विनाम् ॥ ५ ॥

अन्येवै यजुषां लोकाः कर्मिणामपरे तथा ॥
क्षमावतां ब्रह्मलोके लोकाः परमपूजिताः ॥ ६ ॥

क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ॥
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः ॥ ७ ॥

तां क्षमां तादृशीं कृष्णे कथमस्मद्विधस्त्यजेत् ॥
यस्यां ब्रह्मच सत्यंच यज्ञालोकाश्चधिष्ठिताः ॥ ८ ॥

क्षन्तव्यमेव सततं पुरुषेण विजानता ॥
यदाहि क्षमते सर्वं ब्रह्म संपद्यते तदा ॥ ९ ॥

क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥
इह सन्मानमृच्छन्ति परत्र च शुभां गतिम् ॥ १० ॥

येषां मन्युर्मनुष्याणां क्षमयाऽभिहतः सदा ॥
तेषां परतरे लोकास्तस्मात्क्षांतिः परा मता ॥ ११ ॥
इति गीताः काश्यपेन गाथा नित्यं क्षमावताम् ॥
श्रुत्वा गाथाः क्षमायास्त्वं तुष्य द्रौपदि माक्रुधः ॥१२॥
पितामहः शांतनवः क्षमां संपूजयिष्याति ॥
कृष्णश्च देवकीपुत्रः क्षमां संपूजयिष्याति ॥ १३ ॥
आचार्यो विदुरः क्षत्ता शममेव वदिष्यतः ॥
कृपश्च संजयश्चैव शममेव वदिष्यतः ॥ १४ ॥
सोमदत्तो युयुत्सुश्च द्रोणपुत्रस्तथैव च ॥
पितामहश्च नो व्यासः शमं वदति नित्यशः ॥ १५ ॥
सुयोधनो नार्हतीति क्षमामेवं न विन्दति ॥
अर्हस्तत्राहमित्येवं तस्मान्मां विन्दते क्षमा ॥ १६ ॥
एतदात्मवतां वृत्तमेष धर्मः सनातनः ॥
क्षमाचैवानृशंस्यं च तत्कर्तास्म्यहमंजसा ॥ १७ ॥
परैस्ताडितस्यापितत्ताडनसमर्थस्य
चिते क्षोभानुत्पत्तिः क्षमा ॥ १८ ॥

इति काश्यपगीता समाप्ता ॥ १ ॥